# Shri Ganesha Stuti Renukajamadagnikrita

# રેણુકાજમદગ્નીકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Renukajamadagnikrita

File name : gaNeshastutiHreNukAjamadagnIkRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM tRitIyaH khaNDaH | adhyAyaH 37 | 3.37. 6-16||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# રેણુકાજમદગ્નીકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
રેણુકાજમદગ્ની ઉચતુઃ ।
નમસ્તે વિઘ્નપાલાય ભક્તાનાં વિઘ્નહારિણે ।
વિઘ્નકર્ત્રે હ્યભક્તાનાં બ્રહ્મભૂતાય તે નમઃ ॥ ૬॥
અનાદયે ત્વનાધાર વક્રતુણ્ડસ્વરૂપિણે ।
ગણેશાન અનન્તાનાં ગણાનાં પતયે નમઃ ॥ ૭॥
નાનાશક્તિયુતાયૈવ નાનાભેદકરાય તે ।
નાનાભેદવિહીનાય હેરમ્બાય નમો નમઃ ॥ ૮॥
અમેયમાયયા ચૈવ ખેલકાય ચ ઢુણ્ઢયે ।
સિદ્ધિબુદ્ધિસહાયાય સિદ્ધિબુદ્ધિવરાય ચ ॥ ૯॥
સ્વાનન્દપતયે તુભ્યં ભક્તેભ્યો યોગદાયિને ।
યોગાકારાય યોગાય શાન્તિદાય નમો નમઃ ॥ ૧૦॥
અખણ્ડાનન્દરૂપાય ભુક્તિમુક્તિપ્રદાય ચ ।
લમ્બોદરાય દેવાય ચૈકદન્તાય તે નમઃ ॥ ૧૧॥
મહોદરાય વિઘ્નાનાં પતયે સુખદાયિને ।
મૂષકધ્વજિને તુભ્યં નમો મૂષકવાહન ॥ ૧૨॥
ચતુર્ભુજાય સર્વેષામાદિપૂજ્યાય ભોગિને ।
જ્યેષ્ઠરાજાય સર્વેષાં પિતૃમાતૃસ્વરૂપિણે ॥ ૧૩॥
યં સ્તોતું ન સમર્થાશ્ચ વેદા દેવાઃ શિવાદયઃ ।
યોગિનસ્તં કથં ચાવાં હ્યતસ્ત્વાં પ્રણમાવહે ॥ ૧૪॥
એવં સ્તુત્વા ગણેશાનં પ્રણતૌ ભક્તિસંસ્તુતૌ ।
તાવુત્થાપ્ય ગણાધીશ ઊચિવાન્ હર્ષસંયુતઃ ॥ ૧૫॥
(ફલશ્રુતિઃ)
ગણેશ ઉવાચ ।
વરં ચ વૃણુતં પુત્રૌ દાસ્યામિ મનસીપ્સિતમ્ ।

યમિચ્છથો મહાભાગૌ ભક્તિભાવનિયન્ત્રિતઃ ॥ ૧૬॥

ઇતિ રેણુકાજમદગ્નીકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં તૃતીયઃ ખણ્ડઃ । અધ્યાયઃ ૩૭ । ૩.૩૭। ૬-૧૬॥

- .. mudgalapurANaM tRRitIyaH khaNDaH . adhyAyaH 37 . 3.37. 6-16..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Renukajamadagnikrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*